सप्तपदार्थी

१२२५

हीराबालकृष्ण सपत्रनार्थी
नीपोथी

१५°

१ श्रीगणेशाय नमः ॥ हेतवे जगतामेव संसारार्णवसेतवे । प्रभवे सर्वविद्यानां शंभवे गुरवे नमः ॥ १ ॥ प्रमितिविषयाः प
पदार्थाः । ते च सप्त द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्तैव । तत्र द्रव्याणि । पृथिव्यप्तेजोवाय्वाकाश
कालदिगात्ममनांसि नवैव ॥ गुणास्तु रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपर
त्वा[redacted]परत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशति
रेव ॥ कर्माण्युत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि ॥ सामान्यं परमपरं परापरं चेति ॥ विशे
षास्तु यावन्नित्यद्रव्यवृत्तित्वादनंता एव ॥ समवायस्त्वेक एव ॥ अभावस्तु प्रागभावप्रध्वंसाभावात्यंताभा
वान्योन्याभावाश्चतुर्विधः ॥ पृथिवी नित्याऽनित्या च ॥ परमाणुलक्षणा नित्या कार्यरूपा त्वनित्या ॥ सापि
शरीरेंद्रियविषयरूपा ॥ शरीरमस्मदादीनां प्रत्यक्षसिद्धं ॥ इंद्रियं गंधव्यंजकं ॥ विषयो घटादिः ॥ आपोऽपि पर राम १

माणुलक्षणः कार्य्यलक्षणश्च॥ परमाणुलक्षणा नित्याः कार्य्यलक्षणाऽनित्याः॥ ता अपि शरीरेंद्रियविषयरूपाः॥ शरी
रं वरुणलोके प्रसिद्धं॥ इंद्रियं रसव्यंजकं॥ विषयः सरित्समुद्रादिः॥ तेजोपि नित्यमनित्यं च॥ परमाणुरूपं नित्यं॥ कार्य
रूपं त्वनित्यं॥ तच्च शरीरेंद्रियविषयरूपं॥ शरीरं आदित्यलोके प्रसिद्धं॥ इंद्रियं रूपव्यंजकं॥ विषयो भौमदिव्यमुदर्यमा
करजं चेति॥ वायुरपि नित्योऽनित्यश्च॥ सोपि पूर्ववत्॥ परमाणुलक्षणो नित्यः कार्यलक्षणस्त्वनित्यः॥ स च शरीरेंद्रि
यविषयप्राणलक्षणश्चतुर्विधः॥ शरीरं वायुलोके प्रसिद्धं॥ इंद्रियं स्पर्शव्यंजकं॥ विषयो वृक्षादिकंपजनकः॥ प्राणश्च
शरीरांतरचारी॥ स एव क्रियादिभेदात् प्राणादिसंज्ञां लभते॥ स्तिमितवायुस्तु परमाणुसमूह एवानारब्धद्रव्यः॥
आकाशस्तु घटाकाशादिभेदभिन्नोऽनंत एव॥ कालस्तूत्पत्तिस्थितिविनाशलक्षणस्त्रिविधः॥ दिगैंद्री आग्नेयी याम्या निर्ऋ
ती वारुणी वायवी कौबेरी ऐशानी नागी ऐंद्री ब्राह्मी चेत्येकादशविधः॥ आकाशादित्रयं वस्तुतस्त्वेकमुपाधिभेदान्नानाभू
तं॥ आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः॥ परमात्मेश्वर एक एव॥ क्षेत्रज्ञास्त्वनादयोऽनंता एव॥ मनस्तु प्रत्यात्म

निष्ठत्वादनंतं ॥ आकाशादिपंचकं नित्यमेव ॥ अपरं नित्यानित्यरूपं ॥ सितलोहितपीतकपिलकृष्णहरितचित्रभेदात्सप्तविधं ॥ रसोपि मधु
रतिक्तकटुकषायाम्ललवणचित्रभेदात्सप्तविधः ॥ गंधो द्विधा ॥ सुरभिरसुरभिश्च ॥ स्पर्शः शीतोष्णानुष्णाशीतभेदात्त्रिविधः ॥ संख्यैकत्व
द्वित्वबहुत्वभेदात्त्रिविधा ॥ परिमाणमणुमहद्दीर्घह्रस्वभेदाच्चतुर्विधं ॥ पृथक्त्वमेकानेकवृत्ति ॥ संयोगो द्विविधः ॥ कर्मजः संयोगजश्च ॥
विभागो द्विविधः ॥ कर्मजो विभागजश्चेति ॥ परत्वं दिक्कृतं कालकृतं चेति ॥ अपरत्वं कालकृतं दिक्कृतं चेति ॥ बुद्धिरपि स्मृतिरनुभवश्च ॥ अनु
भवोपि द्विविधः ॥ प्रमा अप्रमा च ॥ प्रमा प्रत्यक्षमनुमितिश्च ॥ अप्रमापि संशयो विपर्ययश्च ॥ प्रत्यक्षं सप्तप्रकारं ॥ षडिंद्रियालौकिकं
श्चेति ॥ अनुमितिरपि त्रिविधा ॥ लिंगस्य त्रैविध्यात् ॥ केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकी चेति ॥ तदपि स्वार्थं परार्थं च ॥
परार्थांगानि ॥ प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि ॥ उभययोगानि ॥ पक्षधर्मत्वं ॥ सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधि
तविषयत्वं असत्प्रतिपक्षत्वं चेति ॥ तदाभासाः ॥ असिद्धविरुद्धानैकांतिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाः ॥
एवं प्रत्यभिज्ञा हानोपादानोपेक्षाज्ञानान्यपि ॥ ऊहोनध्यवसायोस्तु संशय एव ॥ सुखं तु सांसारिकं स्वर्गश्च ॥ दुःखमपि
दुःखकरणमात्रमप्रभवं ॥ इच्छापि साध्यविषया साधनविषया च ॥ द्वेषोपि साध्यविषयः साधनविषयश्च ॥ प्रयत्नोपि राम
२

परत्वापरत्वानधिकरणं कालः आदित्यसंयोगात्वाद्य परत्वापरत्वासमवायिकारणाधारः २

ज्ञानाधीनज्ञानोऽभावः पृथिवीत्वसामान्यवती पृथिवी गंधवती वा अप्त्वजातिमत्यः शीतस्पर्शा आपः तेजस्त्वजातियो
गि उष्णस्पर्शं तेजः वायुत्वजातियोगी अरूपस्पर्शवान् वायुः शब्दगुणमाकाशं आदित्यपरिवर्त्तनोत्पाद्यपरत्वापरत्वासमवा
यिकारणाधारः परत्वापरत्वानधिकरणं दिक् आत्मत्वसामान्यवान् बुद्धिगुणाश्रय आत्मा मनस्त्वजातियोगि स्पर्शशून्यं क्रिया
धिकरणं मनः रूपत्वजातियोगि रूपं चक्षुर्मात्रग्राह्यो गुणः रसत्वजातियोगी रसन[illegible]ग्राह्यो गुणो रसः गंधत्वजातियोगी[illegible]
घ्राणग्राह्यो गुणो गंधः स्पर्शत्वजातियोगी[illegible] स्पर्शनमात्रग्राह्यो गुणः स्पर्शः संख्यात्वसामान्यवती गणनासाधारणं कारणं संख्या
परिमाणत्वजातियोगि परिमाणं मानव्यवहारासाधारणं कारणं परिमाणं पृथक्त्वजातियोगि पृथक्त्वं पृथक्कासाधारणं कार
णं पृथक्त्वं संयोगत्वसामान्यवान् अनित्यः संबंधः संयोगः विभागत्वसामान्यवान् विभक्तव्यवहारासाधारणं कारणं विभागः
परत्वजातियोगि परव्यवहारासाधारणं कारणं परत्वं अपरत्वसामान्ययोगि अपरव्यवहारासाधारणं कारणं अपरत्वं
बुद्धित्वसामान्यवती आत्माश्रयः प्रकाशो बुद्धिः सुखत्वसामान्यवन्निरुपाध्यनुकूलवेद्यं सुखं दुःखत्वजातियोगि निरुपाधि

द्वितीयादिपतनासमवायिकारणे वेगे अति॰ फलत्वयष्टिसंयोगे अति॰ २

लक्षपत्रप प्रतिकूलवेद्यं दुःखं। इच्छात्ववती अर्थित्वलक्षणेच्छा। द्वेषत्वजातिमान् प्रज्वलनात्मको द्वेषः। प्रयत्नत्वसामान्यवान् प्रयत्नः। प्रय
त्नः व्यवहारासाधारणं कारणं प्रयत्नः। गुरुत्वजातिमत् आद्यपतनासमवायिकारणमेकव्यक्तिवृत्ति गुरुत्वं। द्रवत्वजातिम
देकव्यक्तिवृत्तिस्यंदनासमवायिकारणं द्रवत्वं। स्नेहत्वसामान्यवान् द्रवत्वमन्यः संग्रहासाधारणं कारणं स्नेहः। संस्कारत्वजा
तिमान् स्वोत्पन्नवस्थापादको गुणस्संस्कारः। धर्मत्वजातिमान् सुखासाधारणं कारणं धर्मः। अधर्मत्वसामान्यवान् दुःखासाधा
रणं कारणं अधर्मः। शब्दत्वजातियोगी श्रोत्रग्राह्यो गुणः शब्दः। उत्क्षेपणत्वजातियोगि ऊर्ध्वदेशसंयोगासमवायिकारणं कर्मोत्क्षे
पणं। अपक्षेपणत्वजातिमदधोदेशसंयोगासमवायिकारणं कर्मापक्षेपणं। आकुंचनत्वजातियोगि वक्रत्वापादकं कर्माकुंच
नं। प्रसारणत्वसामान्यवत् ऋजुत्वापादकं कर्म प्रसारणं। गमनत्वसामान्यवदनियतदेशसंयोगासमवायिकारणं कर्म गमनं।
व्यापकमात्रं सामान्यं परं। व्याप्यमात्रं सामान्यमपरं। व्याप्यव्यापकरूपं सामान्यं परापरं। अनादिः सांतः प्रागभावः। सादिरनंतः ॥८॥
प्रध्वंसाभावः। अनादिरनंतः संसर्गाभावो त्यंताभावः। तादात्म्यनिषेधोऽन्योन्याभावः। नित्यत्वं प्रध्वंसविरहः। अनित्यत्वं प्र

न्वोध्यनंतरमिति निरोषः। स्वकार्यरूपादि ६

व ध्वंसत्वं। निरवयवः क्रियावान् परमाणुः। द्रव्यसमवायिकारणं अवयवः। द्रव्यानारंभककार्यद्रव्यं अंत्यावयवि। कार्यसमवाय
यि प्रागभाववत्कार्यं। भोगायतनं अंत्यावयविशरीरं। स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो भोगः। यदवच्छिन्ने आत्मनि भोग
स्तदायतनं। साक्षात्कारिज्ञानकरणं अतींद्रियं इंद्रियं। ज्ञायमानं आत्मनो भोगकारणं विषयः। पार्थिवमात्रेंधनं तेजो भौमं। जलमा
त्रेंधनं तेजो दिव्यं। पार्थिवजलेंधनं तेज उदर्यं। निरिंधनं तेज आकरजं। तच्च सुवर्णादि। सकलकारणयौगपद्यं उत्पत्तिः। अने
केषामेकक्षणसंबंधो यौगपद्यं। विभागानुत्पादविभागप्रागभावसंबद्धकर्मावच्छिन्नः कालः क्षणः। तन्मात्रावस्थायित्वं क्षणि
कं। स्थितिर्वर्त्तमानत्वं। तच्च ध्वंसानवच्छिन्नप्राक्कालसंबंधित्वाभावरहितस्वरूपत्वं। स्वकार्यप्रागभावसंबंधित्वं वा। विना
शः प्रध्वंसः। शरीरसंबंधेन ज्ञानवत्त्वं देहजत्वं। प्रत्यात्मसमवेतधर्माधर्मोपगृहीतत्वं प्रत्यात्मनिष्ठत्वं। सितादीनां सप्तानां
सितत्वादिकं लक्षणं। मधुरादीनां सप्तानां मधुरत्वादिकं। अण्वादीनां अणुत्वादिकं। एकपृथक्त्वादीनां एकपृथक्त्वादिकं। कर्म
समवायिकारणको विभागः कर्मजः विभागः। विभागासमवायिकारणको विभागो विभागजः। आदित्यपरिवर्त्तनोत्पाद्यं परत्वाप

= गंधयोः सुरभित्वासुरभित्वे [illegible] संयोगः कर्मजः। संयोगासमवायिकारणकः संयोगः संयोगजः

सप्तपदार्थी

५

रत्वं कालकृतं। आदित्यसंयोगानुत्पाद्यं परत्वापरत्वं दिक्कृतं। भावनासाधारणं कारणं ज्ञानं स्मृतिः। अस्मृतिरूपं ज्ञानमनु
भवः। तत्त्वानुभवः प्रमा। अतत्त्वानुभवः अप्रमा। अनवधारणं ज्ञानं संशयः। अवधारणरूपातत्त्वज्ञानं विपर्ययः। अज्ञायमानकर
णजन्यस्तत्त्वानुभवः प्रत्यक्षप्रमा। ज्ञायमानकरणजन्यस्तत्त्वानुभवोऽनुमितिप्रमा। प्रमायोगव्यवच्छिन्नं प्रमाणं। प्रत्यक्षप्रमायोग
प्रत्यक्षप्रमाणं व्यवच्छिन्नं प्रत्यक्षप्रमाणं। तच्च घ्राणरसनचक्षुःस्पर्शनश्रोत्रमनोलक्षणं। अनुमितिप्रमायोगव्यवच्छिन्नमनुमानं। तच्च व्याप्ति अनुमानं
पक्षधर्मताविशिष्टलिंगज्ञानं। व्याप्तिश्च व्यापकस्य व्याप्याधिकरणोपाध्यभावविशिष्टः संबंधः। पक्षधर्मता च व्याप्यस्य पक्षसंबं
त धः। व्यापकं साध्यं व्याप्यं लिंगं। साधनाव्यापकत्वे सति साध्यसमव्याप्त उपाधिः। पक्षव्यापकः सपक्षस्पर्शी विपक्षशून्योऽबाधित
विषयोऽसत्प्रतिपक्षः केवलान्वयी। पक्षव्यापकः सपक्षशून्यो विपक्षाद्व्यावृत्तोऽबाधितविषयोऽसत्प्रतिपक्षः केवलव्यतिरे
की। संदिग्धसाध्यत्वेनोपात्तत्वं पक्षत्वं। निश्चितसाध्याधिकरणत्वं सपक्षत्वं। निश्चितसाध्यानधिकरणत्वं विपक्षत्वं। स्वार्थत्व ।।५।।
मर्थरूपत्वं। परार्थत्वं शाब्दरूपत्वं। शाब्दस्याप्यनुमानविषयत्वेनाविनाभावोपजीवकत्वेनानुमानत्वं। तत्र पक्षवचनं प्रतिज्ञा।

२ पक्षव्यापकः सपक्षस्पर्शी विपक्षाद्व्यावृत्तोऽबाधितविषयो [illegible]

लिंगस्यपक्षधर्मत्ववचनंहेतुः।सम्यक्दृष्टांतत्ववचनमुदाहरणं।लिंगपरामर्शत्ववचनमुपनयः।लिंगसंबंधप्रयुक्तनि
श्चितसाध्यत्ववचनंनिगमनं।अंगविकल्पमाभासत्वं।लिंगत्वेनानिश्चितत्वमसिद्धत्वं।पक्षविपक्षमात्रस्यवृत्तित्वंविरुद्धत्वं।प
क्षत्रयवृत्तित्वमनैकांतिकत्वं।साध्यसाधकःपक्षएववर्त्तमानोहेतुरनध्यवसितः।साध्यतदभावसाध्यत्वंसंदिग्धत्वं।उपजीव्य
प्रमाणनिश्चितसाध्यविपरीतत्वंकालात्ययापदिष्टत्वं।साध्याभावसाधकहेत्वंतरत्वंप्रकरणसमत्वं।अनिष्टव्यापकप्रसंजनं
तर्कः।तुल्यत्वेनाभावयोःप्रत्यभाववचनंप्रसंजनं।निद्रादुष्टांतःकरणजंज्ञानंस्वप्नः।योगजधर्मानुगृहीतस्यमनसोनिरिंद्रि
यप्रदेशेऽवस्थानंनिद्रा।वस्तुस्वरूपमात्रग्रहणंनिर्विकल्पकं।विशिष्टग्रहणंसविकल्पकं।अतीतावस्थावच्छिन्नवस्तुनइदंत्वे
नग्रहणंप्रत्यभिज्ञानं।दुःखसाधनत्वज्ञानंहानं।सुखसाधनत्वज्ञानमुपादानं।उभयासाधनत्वज्ञानमुपेक्षा।अनालिंगिते
नयकोट्यनवधारणज्ञानमनध्यवसायः।प्रयत्नोत्पाद्यसाधनाधीनंसुखंसांसारिकं।इच्छामात्राधीनसाधनसाध्यंसुखंस्व
र्गसुखं।सांसिद्धिकत्वंतेजःसंयोगानुत्पाद्यत्वं।तेजःसंयोगोत्पाद्यत्वंनैमित्तिकत्वं।कर्मजःसंस्कारोवेगः।ज्ञानजःसंस्कारोभावना।

समवपदार्थी रगुत्वापादकः संस्कारः स्थितस्थापकः। अव्यापकत्वं स्वाऽभावसादेश्यं। तदभावो व्यापकत्वं। विहितत्वं धर्मोत्पादकत्वं। अधर्मोत्पा एकाश्रयत्व
नयाभावत्व दकत्वं निषिद्धत्वं। उभयविपरीतत्वमुदासीनत्वं। निर्बाधकं सामान्यं जातिः। सबाधकं सामान्यमुपाधिः। आरोपितनीलरूपोऽभावोऽन्धका
रः। ज्ञानसंबंधो ज्ञानविषयत्वं। तत्त्वज्ञानेन नियमेनावछेद्यत्वं प्रमेयत्वं। गुणादिषु च संख्याव्यवहारः संख्याप्रत्यासत्तिनिबंधनः। अ
त एव संख्याप्रत्यासत्तिनिबंधनत्वं। कार्योत्पादकत्वं कारणत्वं। स्वसमवेतकार्योत्पादकत्वं समवायिकारणत्वं। समवायिकारणप्रत्यास
भिन्नत त्तेमवधृतसामर्थ्यमसमवायिकारणत्वं। उभयविपरीतं कारणं निमित्तकारणं। इयत्तावच्छिन्नपरिमाणयोगित्वं मूर्त्तत्वं। तदभावोऽ
मूर्त्तत्वं। कार्यायोगव्यवच्छिन्ना सामग्री। संज्ञामात्रेण पदार्थाभिधानमुद्देशः। रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागवि
भागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराः पृथिवीसमवेताः। रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्ने गुरुत्व
हसंस्काराः अप्सु समवेताः। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्काराः तेजःसमवेताः। स्पर्शसंख्या ॥६॥
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः वायुसमवेताः। संख्यापरिमाणपृथक्त्वसंयोगविभागशब्दाः आकाशसमवेताः॥

समवायता। संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालदिक्समवेताः। संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखे [illegible]

...नयाभाव र्माधर्मसंस्कारा आत्मसमवेताः। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः मनःसमवेताः। कर्म मूर्त [illegible]

नित्यमेव। सामान्यं द्रव्यगुणकर्मसमवेतमेव। विशेषा नित्यद्रव्यसमवेताः। समवायाभावावसमवेतावेव। द्रव्यं तु कार [illegible]

समवेतं। अकार्यद्रव्यमसमवेतं। विनाशस्तु द्रव्यस्य समवाय्यसमवायिकारणविनाशाभ्यां। गुणस्य तु समवाय्यसमवायिनिमित्तै [illegible]

वि५ णैर्नाशविरोधिगुणेभ्यः। कर्मणः समवायिकारणनाशोत्तरसंयोगाभ्यां विनाशः। प्रागभावस्य प्रतियोग्युत्पादकसामग्रीतः। अन्यो

न्याभावस्य प्रतियोगिविनाशकारणात्। उत्पत्तिस्तु द्रव्यगुणकर्मणां समवाय्यसमवायिनिमित्तकारणेभ्यः। समवायिकारणं त्रयाणां तत्र ४

द्रव्यमेव। असमवायिकारणं द्रव्यकर्मणोः संयोग एव। गुणस्य तु समवायिकारणं क्वचित्समानजातीयं क्वचिदसमानजातीयं गुणांतरं कर्म वा। क्वचित् २

निमित्तकारणं तु सर्वेषामेवेश्वरेच्छादृष्टादिकं। अन्योन्याभावप्रध्वंसाभावयोस्तु निमित्तादेव केवलादुत्पत्तिरिति। अपरं तु शास्त्रं तु सकलं

बोध्यमिति। विशिष्टमन्यव्यावृत्तिः। समानाधिकरणं व्यावर्तकं विशेषणं। एकविभक्त्यंतपदवाच्यत्वं सामानाधिकरण्यं। व्यधिकरण

सर्वदा पामनच्छेदकमुपलक्षणं। भिन्नविभक्त्यंतपदवाच्यत्वं वैयधिकरण्यं। जातिप्रत्यासन्निरधिकरणत्वं। समस्तमूर्त्तसंयोगित्वं विभुत्वं। विद्य
मानयोः संबंधो युतसिद्धिः। अविद्यमानयोराधाराधेययोः संबंधोऽयुतसिद्धिः। वस्तुनअभ्युदयनिश्रेयसयोः साधनाभिधानकं शास्त्रं॥
शीप३ सप्तदीपाधराद्यावत्तद्यावत्समस्ताधराधराः तावत्सप्तपदार्थीयमस्तु वस्तुप्रकाशिनी। क्षणमात्रावस्थायित्वं क्षणिकत्वं। क्षणस्तु विभाग
नुत्पादविभागप्रागभावसंबद्धकर्मावच्छिन्नः कालः। प्रत्यर्थक्रियावत्त्वं वा क्षणिकत्वं। अवस्थितमवस्तु शब्दः संयोगादिजाः। द्वा
द्वजारपतः नैवोपांत्यः शब्दः क्षणिकः। शब्दोंबरगुणः। स्पर्शः पृथिव्यप्तेजोवायुगुणः। रूपं पृथिव्यप्तेजोगुणः। रसोऽपांगुणः। गंधः पृ
थिव्याः॥ छ॥ इति शिवादित्यविरचिता सप्तपदार्थी समाप्ता॥ ॥ ॥छ॥ श्रीरामार्पणमस्तु॥छ॥ संवदेकरसयुक्तवत्सरे ... कुव
र्षसमये ... लिखितिका। माघयुक्तवदिपक्षतियुक्ते रोहिणेयगगने प्रणियुक्ते॥१॥ काश्यां नीलकंठसंनिधौ हर्षाल्मजेनोदीचिना
तेनेन परशुरामेण स्वपठनार्थं समाप्य लिखितं॥ शुभमस्तु॥ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानि विद्या ॥७॥
पीधर्मस्य च चतुर्दश॥ श्रोत्रवत्समादिति कुलनिरयादानंतु प्रत्यया ... वातत्वं त्वेति शिवधवः ... नवतीसंतर ... प्रवर्तते ... प्रत्यय॥
... शास्त्रं ... ... नरस्यनादि ... ... लंकिनिपुस्तिकेयमसिमेधर ...

उत्तमाचरत्रर्णि लपि त्रिलोकमानेश्चलदृष्टिनायदमुनावय ...